भाषापरिच्छेदे

विश्वनाथन्यायपञ्चानन–विरचिते

# भाषापरिच्छेदे

# अनुमानखण्डम्

डा. दिलीपकुमारपण्डा, एम्.ए, पि.एइच.डि

अध्यक्षः मयनाकलेजः

पियालीवेरा, एम्.ए, वि. एड्सेट्.

बि.एल.पाब्लिकेशन

३ श्यामाचरण दे स्ट्रीट

कलिकाता—७०००७३

# अनुमानखण्डम्

(অনুমিতির কারণ)

●**कारिका**— व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्।। (६६)

अनुमायां, ज्ञायमानं लिङ्गन्तु करणं न हि।

अनागतादि-लिङ्गेन न स्यादनुमितिस्तदा।। (६७)

◎ **অনুবাদ** ---- অনুমিতিরূপ অনুভবে ব্যাপ্তিনিশ্চয় হচ্ছে কারণ এবং পরামর্শ হলো ব্যাপার। জ্ঞায়মান লিঙ্গ কিন্তু করণ নয়, কারণ, তাহলে ভবিষ্যৎ ও অতীত ধূমের দ্বারা অনুমিতি হতে পারবে না।

◆सिद्धान्तमुक्तावली(१)—अनुमितिं व्युत्पादयति। व्यापरस्तु इति। अनुमायानुमितौ व्याप्तिज्ञानं करणं, परामशी व्यापारः। तथा हि येन पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिर्गृहीता, पश्चात् स एव पुरुषः क्वचित् पर्वतादाविच्छिन्नमूलां धूमरेखां पश्यति। तदनन्तरं धूमो वह्निव्याप्य इत्येवं व्याप्तिस्मरणं तस्य भवति। पश्चाच्च वह्निव्यायधूमवानयमिति ज्ञानं भवति, स एव परामर्श इच्युच्यते, तदनन्तरं पर्वतो वह्निमानित्यनुमितिर्जायते।

अत्र प्राचीनास्तु व्याप्यत्वेन ज्ञायमानं लिङ्गमनुमिति करणमिति वदन्ति। तद् दूषयति—ज्ञायमानमिति। लिङ्गस्यानुमित्यकरणत्वे युक्तिमाह—अनागतादि। यद्यनुमितौ लिङ्गं करणं स्यात्, तदानागतेन लिङ्गेन विनष्टेन चानुमितिर्न स्यात्, अनुमिति-करणस्य लिङ्गस्य तदानीमभावात्।।

✹ **বঙ্গানুবাদ** ----অনুমিতিরূপ অনুভবকে বোঝানো হচ্ছে—ব্যাপারস্তু—এর দ্বারা অনুমায়াম্ অর্থাৎ অনুমিতিতে ব্যাপ্তিজ্ঞান হলো করণ, পরামর্শ হলো ব্যাপার। যেমন—যে পুরুষ মহানসাদিতে ধূমে বহ্নির ব্যাপ্তি দেখেছে, সেই পুরুষই কখনো পর্বত প্রভৃতিতে অবিচ্ছিন্নমূলা ধূমরেখা দেখে। তারপরে তার 'ধূম বহ্নির ব্যাপ্য' এরূপ ব্যাপ্তিস্মরণ হয়। তারপর 'ইহা বহ্নির ব্যাপ্যধূমবিশিষ্ট' এরূপ নিশ্চয় হয়। এই নিশ্চয়কেই পরামর্শ